श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.22- पंचम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(ṽ) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(ỹ) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ द्वाविं(म्)शोऽध्यायः ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. athadvāviṃ(m)śo'dhyāyaḥ ..**

**उद्धव उवाच**

**कति तत्त्वानि विश्वेश, सं(ङ्)ख्यातान्यृषिभिः(फ्) प्रभो ।**
**नवैकादश पं(ञ्)च त्रीण्- यात्थ त्वमिह शुश्रुम ॥ 1॥**

uddhava uvāca

kati tattvāni viśveśa, saṃ(ṅ)khyātānyṛṣibhiḥ(ph) prabho .

navaikādaśa paṃ(ñ)ca trīṇ- yāttha tvamiha śuśruma .. 1..

केचित् षड्विं(म्)शतिं(म्) प्राहु- रपरे पं(ञ्)चविं(म्)शतिम्।

सप्तैके नव षट् केचिच्-चत्वार्येकादशापरे ॥ 2॥

kecit ṣaḍviṃ(m) śatiṃ(m) prāhu- rapare paṃ(ñ)caviṃ(m)śatim .

saptaike nava ṣaṭ kecic- catvāryekādaśāpare .. 2..

केचित् सप्तदश प्राहुः(ष्), षोडशैके त्रयोदश।

एतावत्त्वं(म्) हि सं(ङ्)ख्याना- मृषयो यद्विवक्षया ।

गायन्ति पृथगायुष्मन्- निदं(न्) नो वक्तुमर्हसि ॥ 3॥

Kecit saptadaśa prāhuḥ(ṣ), ṣoḍaśaike trayodaśa

etāvattvaṃ(m) hi saṃ(ṅ)khyānā- mṛṣayo yadvivakṣayā .

gāyanti pṛthagāyuṣman- nidaṃ(n) no vaktumarhasi .. 3..

श्रीभगवानुवाच

युक्तं(ञ्) च सन्ति सर्वत्र ,भाषन्ते ब्राह्मणा यथा ।

मायां(म्) मदीयामुद्गृह्य ,वदतां(ङ्) किं(न्) नु दुर्घटम् ॥ 4॥

śrībhagavānuvāca

yuktaṃ(ñ) ca santi sarvatra, bhāṣante brāhmaṇā yathā .

māyāṃ(m) madīyāmudgṛhya, vadatāṃ(ṅ) kiṃ(n) nu durghaṭam .. 4..

नैतदेवं(यँ) यथाऽऽत्थ त्वं(यँ), यदहं(वँ) वच्मि तत्तथा ।

एवं(वँ) विवदतां(म्) हेतुं(म्), शक्तयो मे दुरत्ययाः ॥ 5॥

naitadevaṃ(ỹ) yathāttha tvaṃ(ỹ), yadahaṃ(v̐) vācmi tattathā .

evaṃ(v̐) vivadatāṃ(m) hetuṃ(m), śaktayo me duratyayāḥ .. 5..

यासां(वँ) व्यतिकरादासीद्, विकल्पो वदतां(म्) पदम् ।

प्राप्ते शमदमेऽप्येति ,वादस्तमनुशाम्यति ॥ 6॥

yāsāṃ(v̐) vyatikarādāsīd, vikalpo vadatāṃ(m) padam .

prāpte śamadame'pyeti, vādastamanuśāmyati .. 6..

परस्परानुप्रवेशात्, तत्त्वानां(म्) पुरुषर्षभ ।

पौर्वापर्यप्रसं(ङ्)ख्यानं(यँ) ,यथा वक्तुर्विवक्षितम् ॥ 7॥

Parasparānupraveśāt, tattvānāṃ(m) puruṣarṣabha .

paurvāparyaprasaṃ(ṅ)khyānaṃ(ỹ), yathā vakturvivakṣitam .. 7..

एकस्मिन्नपि दृश्यन्ते , प्रविष्टानीतराणि च ।

पूर्वस्मिन् वा परस्मिन् वा , तत्त्वे तत्त्वानि सर्वशः ॥ 8॥

ekasminnapi dṛśyante, praviṣṭānītarāṇi ca .

pūrvasmin vā parasmin vā, tattve tattvāni sarvaśaḥ .. 8..

पौर्वापर्यमतोऽमीषां(म्), प्रसं(ङ्)ख्यानमभीप्सताम्।

यथा विविक्तं(यँ) यद्वक्त्रं(ङ्), गृह्णीमो युक्तिसम्भवात् ॥ 9॥

paurvāparyamato'mīṣāṃ(m), prasaṃ(ṅ)khyānamabhīpsatām .

yathā viviktaṃ(ỹ) yadvaktraṃ(ṅ), gṛhṇīmo yuktisambhavāt .. 9..

अनाद्यविद्यायुक्तस्य , पुरुषस्यात्मवेदनम् ।

स्वतो न सम्भवादन्यस्- तत्त्वज्ञो ज्ञानदो भवेत् ॥ 10॥

Anādyavidyāyuktasya, puruṣasyātmavedanam .

svato na sambhavādanyas- tattvajño jñānado bhavet .. 10..

पुरुषेश्वरयोरत्र, न वैलक्षण्यमण्वपि ।

तदन्यकल्पनापार्था, ज्ञानं(ञ्) च प्रकृतेर्गुणः ॥ 11॥

puruṣeśvarayoratra, na vailakṣaṇyamaṇvapi .

tadanyakalpanāpārthā, jñānaṃ(ñ) ca prakṛterguṇaḥ .. 11..

प्रकृतिर्गुणसाम्यं(वँ) वै, प्रकृतेर्नात्मनो गुणाः ।

सत्त्वं(म्) रजस्तम इति , स्थित्युत्पत्त्यन्तहेतवः ॥ 12॥

prakṛtirguṇasāmyaṃ(v̐) vai prakṛternātmano guṇāḥ .

sattvaṃ(m) rajastama iti, sthityutpattyantahetavaḥ .. 12..

सत्त्वं(ञ्) ज्ञानं(म्) रजः(ख्) कर्म ,तमोऽज्ञानमिहोच्यते ।

गुणव्यतिकरः(ख्) कालः(स्), स्वभावः(स्) सूत्रमेव च ॥ 13॥

sattvaṃ(ñ) jñānaṃ(m) rajaḥ(kh) karma, tamo'jñānamihocyate .

guṇavyatikaraḥ(kh) kālaḥ(s), svabhāvaḥ(s) sūtrameva ca .. 13..

पुरुषः(फ्) प्रकृतिर्व्यक्त- महं(ङ्)कारो नभोऽनिलः ।

ज्योतिरापः क्षितिरिति , तत्त्वान्युक्तानि मे नव ॥ 14॥

puruṣaḥ(ph) prakṛtirvyakta- mahaṃ(ṅ)kāro nabho'nilaḥ .

jyotirāpaḥ kṣitiriti, tattvānyuktāni me nava .. 14..

श्रोत्रं(न्) त्वग्दर्शनं(ङ्) घ्राणो, जिह्वेति ज्ञानशक्तयः ।

वाक्पाण्युपस्थपाय्वङ्घ्रि- कर्माण्यं(ङ्)गोभयं(म्) मनः ॥ 15॥

śrotraṃ(n) tvagdarśanaṃ(ṅ) ghrāṇo, jihveti jñānaśaktayaḥ .

vākpāṇyupasthapāyvaṅghriḥ- karmāṇyaṃ(ṅ)gobhayaṃ(m) manaḥ .. 15..

शब्दः(स्) स्पर्शो रसो गन्धो, रूपं(ञ्) चेत्यर्थजातयः ।

गत्युक्त्युत्सर्गशिल्पानि, कर्मायतनसिद्धयः ॥ 16॥

śabdaḥ(s) sparśo raso gandho, rūpaṃ(ñ) cetyarthajātayaḥ .

gatyuktyutsargaśilpāni, karmāyatanasiddhayaḥ .. 16..

सर्गादौ प्रकृतिर्ह्यस्य, कार्यकारणरूपिणी ।

सत्त्वादिभिर्गुणैर्धत्ते, पुरुषोऽव्यक्त ईक्षते ॥ 17॥

sargādau prakṛtirhyasya, kāryakāraṇarūpiṇī .

sattvādibhirguṇairdhatte, puruṣo'vyakta īkṣate .. 17..

व्यक्तादयो विकुर्वाणा ,धातवः(फ्) पुरुषेक्षया ।

लब्धवीर्याः(स्) सृजन्त्यण्डं(म्), सं(म्)हताः(फ्) प्रकृतेर्बलात् ॥ 18॥

vyaktādayo vikurvāṇā, dhātavaḥ(ph) puruṣekṣayā .

labdhavīryāḥ(s) sṛjantyaṇḍaṃ(m), saṃ(m)hatāḥ(ph) prakṛterbalāt .. 18..

सप्तैव धातव इति ,तत्रार्थाः(फ्) पं(ञ्)च खादयः ।

ज्ञानमात्मोभयाधारस् - ततो देहेन्द्रियासवः ॥ 19॥

saptaiva dhātava iti, tatrārthāḥ(ph) paṃ(ñ)ca khādayaḥ .

jñānamātmobhayādhāras- tato dehendriyāsavaḥ .. 19..

षडित्यत्रापि भूतानि ,पं(ञ्)च षष्ठः(फ्) परः(फ्) पुमान् ।

तैर्युक्त आत्मसम्भूतैः(स्), सृष्ट्वेदं(म्) समुपाविशत् ॥ 20॥

ṣaḍityatrāpi bhūtāni, paṃ(ñ)ca ṣaṣṭhaḥ(ph) paraḥ(ph) pumān .
tairyukta ātmasambhūtaiḥ(s), sṛṣṭvedaṃ(m) samupāviśat .. 20..

चत्वार्येवेति तत्रापि , तेज आपोऽन्नमात्मनः ।
जातानि तैरिदं(ञ्) जातं(ञ्), जन्मावयविनः(ख्) खलु ॥ 21॥
catvāryeveti tatrāpi, teja āpo'nnamātmanaḥ .
jātāni tairidaṃ(ñ) jātaṃ(ñ), janmāvayavinaḥ(kh) khalu .. 21..

सं(ङ्)ख्याने सप्तदशके, भूतमात्रेन्द्रियाणि च ।
पं(ञ्)च पं(ञ्)चैकमनस, आत्मा सप्तदशः(स्) स्मृतः ॥ 22॥
saṃ(ṅ)khyāne saptadaśake, bhūtamātrendriyāṇi ca .
paṃ(ñ)ca paṃ(ñ)caikamanasa, ātmā saptadaśaḥ(s) smṛtaḥ .. 22..

तद्वत् षोडशसं(ङ्)ख्याने, आत्मैव मन उच्यते ।
भूतेन्द्रियाणि पं(ञ्)चैव, मन आत्मा त्रयोदश ॥ 23॥
tadvat ṣoḍaśasaṃ(ṅ)khyāne, ātmaiva mana ucyate .
bhūtendriyāṇi paṃ(ñ)caiva, mana ātmā trayodaśa .. 23..

एकादशत्व आत्मासौ, महाभूतेन्द्रियाणि च ।
अष्टौ प्रकृतयश्चैव, पुरुषश्च नवेत्यथ ॥ 24॥
ekādaśatva ātmāsau, mahābhūtendriyāṇi ca .
aṣṭau prakṛtayaścaiva, puruṣaśca navetyatha .. 24..

इति नानाप्रसं(ङ्)ख्यानं(न्), तत्त्वानामृषिभिः(ख्) कृतम् ।
सर्वं(न्) न्याय्यं(यँ) युक्तिमत्त्वाद् , विदुषां(ङ्) किमशोभनम् ॥ 25॥

iti nānāprasaṃ(ṅ)khyānaṃ(n), tattvānāmṛṣibhiḥ(kh) kṛtam .

sarvaṃ(n) nyāyyaṃ(ỹ) yu*ktimattvād, viduṣāṃ(ṅ) kimaśobhanam .. 25..

उ*द्धव उवाच

प्रकृतिः(फ्) पुरु*षश्चोभौ, य*द्य*प्यात्मविल*क्षणौ ।

अ*न्योन्यापाश्रयात् कृ*ष्ण, दृ*श्यते न भिदा तयोः ॥26॥

u*ddhava uvāca

prakṛtiḥ(ph) puruṣa*ścobhau, ya*dya*pyātmavila*kṣaṇau .

a*nyonyāpāśrayāt kṛ*ṣṇa, dṛ*śyate na bhidā tayoḥ .. 26..

प्रकृतौ ल*क्ष्यते ह्यात्मा, प्रकृति*श्च तथाऽऽत्मनि ।

एवं(म्) मे पु*ण्डरीकाक्ष, महान्तं(म्) सं(म्)शयं(म्) हृदि ।

छेत्तुमर्हसि सर्व*ज्ञ, वचोभिर्नयनैपुणैः ॥ 27॥

prakṛtau la*kṣyate hyātmā, prakṛtiśca tathā''tmani

evaṃ(m) me pu*ṇḍarīkākṣa, mahāntaṃ(m) saṃ(m)śayaṃ(m) hṛdi .

chettumarhasi sarva*jña, vacobhirnayanaipuṇaiḥ .. 27..

त्वत्तो ज्ञानं(म्) हि जीवानां(म्), प्रमोष*स्तेऽत्र श*क्तितः ।

त्वमेव ह्यात्ममायाया, गतिं(वँ) वेत्थ न चापरः ॥ 28॥

tvatto jñānaṃ(m) hi jīvānāṃ(m), pramoṣa*ste'tra śa*ktitaḥ .

tvameva hyātmamāyāyā, gatiṃ(ṽ) vettha na cāparaḥ .. 28..

श्रीभगवानुवाच

प्रकृतिः(फ्) पुरु*षश्चेति, वि*कल्पः(फ्) पुरुषर्षभ ।

एष वैकारिकः(स्) सर्गो, गु*णव्यतिकरात्मकः ॥ 29॥

śrībhagavānuvāca

prakṛtiḥ(ph) puruṣaśceti, vikalpaḥ(ph) puruṣarṣabha .

eṣa vaikārikaḥ(s) sargo, guṇavyatikarātmakaḥ .. 29..

ममाङ्ग माया गुणमय्यनेकधा

विकल्पबुद्धीश्च गुणैर्विधत्ते ।

वैकारिकस्त्रिविधोऽध्यात्ममेक-

मथाधिदैवमधिभूतमन्यत् ॥ 30॥

mamāṅga māyā guṇamayyanekadhā

vikalpabuddhīśca guṇairvidhatte .

vaikārikastrividho'dhyātmameka-

mathādhidaivamadhibhūtamanyat .. 30..

दृग् रूपमार्कं(वँ) वपुरत्र रन्ध्रे,

परस्परं(म्) सिध्यति यः(स्) स्वतः(ख्) खे ।

आत्मा यदेषामपरो य आद्यः(स्),

स्वयानुभूत्याखिलसिद्धसिद्धिः ।

एवं(न्) त्वगादि श्रवणादि चक्षु-

र्जिह्वादि नासादि च चित्तयुक्तम् ॥ 31॥

dṛg rūpamārkaṃ(v̐) vapuratra randhre

parasparaṃ(m) sidhyati yaḥ(s) svataḥ(kh) khe .

ātmā yadeṣāmaparo ya ādyaḥ(s)

svayānubhūtyākhilasiddhasiddhiḥ .

evaṃ(n) tvagādi śravaṇādi cakṣu-

rjihvādi nāsādi ca cittayuktam .. 31..

योऽसौ गुणक्षोभकृतो विकारः(फ्)
प्रधानमूलान्महतः(फ्) प्रसूतः ।
अहं(न्) त्रिवृन्मोहविकल्पहेतुर्-
वैकारिकस्तामस ऐन्द्रियश्च ॥ 32॥

yo'sau guṇākṣobhakṛto vikāraḥ(ph)
pradhānamūlānmahataḥ(ph) prasūtaḥ .
ahaṃ(n) trivṛnmohavikalpahetur-
vaikārikastāmasa aindriyaśca .. 32..

आत्मा परिज्ञानमयो विवादो
ह्यस्तीति नास्तीति भिदार्थनिष्ठः ।
व्यर्थोऽपि नैवोपरमेत पुं(म्)सां(म्)
मत्तः(फ्) परावृत्तधियां(म्) स्वलोकात् ॥ 33॥

ātmā parijñānamayo vivādo
hyastīti nāstīti bhidārthaniṣṭhaḥ .
vyartho'pi naivoparameta puṃ(m)sāṃ(m)
mattaḥ(ph) parāvṛttadhiyāṃ(m) svalokāt .. 33..

उद्धव उवाच
त्वत्तः(फ्) परावृत्तधियः(स्), स्वकृतैः(ख्) कर्मभिः(फ्) प्रभो ।
उच्चावचान् यथा देहान्, गृह्णन्ति विसृजन्ति च ॥ 34॥

uddhava uvāca
tvattaḥ(ph) parāvṛttadhiyaḥ(s), svakṛtaiḥ(kh) karmabhiḥ(ph) prabho .
uccāvacān yathā dehān, gṛhṇanti visṛjanti ca .. 34..

तन्ममाख्याहि गोविन्द, दुर्विभाव्यमनात्मभिः ।
न ह्येतत् प्रायशो लोके, विद्वां(म्)सः(स्) सन्ति वं(ञ्)चिताः॥ 35॥

tanmamākhyāhi govinda, durvibhāvyamanātmabhiḥ .

na hyetat prāyaśo loke, vidvāṃ(m)saḥ(s) santi vaṃ(ñ)citāḥ .. 35..

श्रीभगवानुवाच

मनः(ख्) कर्ममयं(न्) नृणा- मिन्द्रियैः(फ्) पं(ञ्)चभिर्युतम्।

लोकाल्लोकं(म्) प्रयात्यन्य, आत्मा तदनुवर्तते ॥ 36॥

śrībhagavānuvāca

manaḥ(kh) karmamayaṃ(n) nṝṇā- mindriyaiḥ(ph) paṃ(ñ)cabhiryutam .

lokāllokaṃ(m) prayātyanya, ātmā tadanuvartate .. 36..

ध्यायन् मनोऽनु विषयान्, दृष्टान् वानुश्रुतानथ ।

उद्यत् सीदत् कर्मतन्त्रं(म्), स्मृतिस्तदनु शाम्यति ॥ 37॥

dhyāyan mano'nu viṣayān, dṛṣṭān vānuśrutānatha .

udyat sīdat karmatantraṃ(m), smṛtistadanu śāmyati .. 37..

विषयाभिनिवेशेन, नात्मानं(यँ) यत् स्मरेत् पुनः ।

जन्तोर्वै कस्यचिद्धेतोर् - मृत्युरत्यन्तविस्मृतिः॥ 38॥

viṣayābhiniveśena, nātmānaṃ(ỹ) yat smaret punaḥ .

jantorvai kasyaciddhetor- mṛtyuratyantavismṛtiḥ .. 38..

जन्म त्वात्मतया पुं(म्)सः(स्), सर्वभावेन भूरिद ।

विषयस्वीकृतिं(म्) प्राहुर्- यथा स्वप्नमनोरथः ॥ 39॥

janma tvātmatayā puṃ(m)saḥ(s), sarvabhāvena bhūrida .

viṣayasvīkṛtiṃ(m) prāhur- yathā svapnamanorathaḥ .. 39..

स्वप्नं(म्) मनोरथं(ञ्) चेत्थं(म्), प्राक्तनं(न्) न स्मरत्यसौ ।

तत्र पूर्वमिवात्मान- मपूर्वं(ञ्) चानुपश्यति ॥ 40॥

svapnaṃ(m) manorathaṃ(ñ) cetthaṃ(m), prāktanaṃ(n) na smaratyasau.

tatra pūrvamivātmāna- mapūrvaṃ(ñ) cānupaśyati .. 40..

इन्द्रियायनसृष्ट्येदं(न्), त्रैविध्यं(म्) भाति वस्तुनि ।
बहिरन्तर्भिदाहेतुर्- जनोऽसज्जनकृद् यथा ॥41॥

indriyāyanasṛṣṭyedaṃ(n), traividhyaṃ(m) bhāti vastuni .

bahirantarbhidāhetur- jano'sajjanakṛd yathā .. 41..

नित्यदा ह्यं(ङ्)ग भूतानि, भवन्ति न भवन्ति च ।
कालेनालक्ष्यवेगेन, सूक्ष्मत्वात्तन्न दृश्यते ॥ 42॥

nityadā hyaṃ(ṅ)ga bhūtāni, bhavanti na bhavanti ca .

kālenālakṣyavegena, sūkṣmatvāttanna dṛśyate .. 42..

यथार्चिषां(म्) स्रोतसां(ञ्) च, फलानां(वँ) वा वनस्पतेः ।
तथैव सर्वभूतानां(वँ), वयोऽवस्थादयः(ख्) कृताः ॥ 43॥

yathārciṣāṃ(m) srotasāṃ(ñ) ca phalānāṃ(ṽ) vā vanaspateḥ .

tathaiva sarvabhūtānāṃ(ṽ), vayo'vasthādayaḥ(kh) kṛtāḥ .. 43..

सोऽयं(न्) दीपोऽर्चिषां(यँ) यद्वत्- स्रोतसां(न्) तदिदं(ञ्) जलम् ।
सोऽयं(म्) पुमानिति नृणां(म्), मृषा गीर्धीर्मृषायुषाम् ॥ 44॥

so'yaṃ(n) dīpo'rciṣāṃ(ỹ) yadvat- srotasāṃ(n) tadidaṃ(ñ) jalam .

so'yaṃ(m) pumāniti nṛṇāṃ(m), mṛṣā gīrdhīrmṛṣāyuṣām .. 44..

मा स्वस्य कर्मबीजेन, जायते सोऽप्ययं(म्) पुमान् ।
म्रियते वामरो भ्रान्त्या, यथाग्निर्दारुसं(यँ)युतः ॥ 45॥

mā svasya karmabījena, jāyate so'pyayaṃ(m) pumān .

mriyate vāmaro bhrāntyā, yathāgnirdārusaṃ(ỹ)yutaḥ .. 45..

निषेकगर्भजन्मानि, बाल्यकौमारयौवनम् ।
वयोमध्यं(ञ्) जरा मृत्यु- रित्यवस्थास्तनोर्नव॥ 46॥

niṣekagarbhajanmāni, bālyakaumārayauvanam .

vayomadhyaṃ(ñ) jarā mṛtyu- rityavasthāstanornava .. 46..

एता मनोरथमयीर्- ह्यन्यस्योच्चावचास्तनूः।
गुणसं(ङ्)गादुपादत्ते, क्वचित् कश्चिज्जहाति च ॥ 47॥

etā manorathamayīr- hyanyasyoccāvacāstanūḥ .

guṇasaṃ(ṅ)gādupādatte, kvacit kaścijjahāti ca .. 47..

आत्मनः(फ्) पितृपुत्राभ्या- मनुमेयौ भवाप्ययौ ।
न भवाप्ययवस्तूना -मभिज्ञो द्वयलक्षणः॥ 48॥

ātmanaḥ(ph) pitṛputrābhyā- manumeyau bhavāpyayau .

na bhavāpyayavastūnā- mabhijño dvayalakṣaṇaḥ .. 48..

तरोर्बीजविपाकाभ्यां(य्ँ), यो विद्वां(ञ्)जन्मसं(य्ँ)यमौ ।
तरोर्विलक्षणो द्रष्टा, एवं(न्) द्रष्टा तनोः(फ्) पृथक् ॥ 49॥

tarorbījavipākābhyāṃ(ỹ), yo vidvāṃ(ñ)janmasaṃ(ỹ)yamau .

tarorvilakṣaṇo draṣṭā, evaṃ(n) draṣṭā tanoḥ(ph) pṛthak .. 49..

प्रकृतेरेवमात्मान- मविविच्याबुधः(फ्) पुमान् ।
तत्त्वेन स्पर्शसम्मूढः(स्), सं(म्)सारं(म्) प्रतिपद्यते ॥ 50॥

prakṛterevamātmāna- mavivicyābudhaḥ(ph) pumān .

tattvena sparśasammūḍhaḥ(s), saṃ(m)sāraṃ(m) pratipadyate .. 50..

सत्त्वसं(ङ्)गादृषीन् देवान्, रजसासुरमानुषान् ।
तमसा भूततिर्यक्त्वं(म्), भ्रामितो याति कर्मभिः ॥ 51॥

sattvasaṃ(ṅ)gādṛṣīn devān, rajasāsuramānuṣān .
tamasā bhūtatiryaktvaṃ(m), bhrāmito yāti karmabhiḥ .. 51..

नृत्यतो गायतः(फ्) पश्यन्, यथैवानुकरोति तान् ।
एवं बुद्धिगुणान् पश्यन्- ननीहोऽप्यनुकार्यते ॥52॥

nṛtyato gāyataḥ(ph) paśyan, yathaivānukaroti tān .
evaṃ buddhiguṇān paśyan- nanīho'pyanukāryate .. 52..

यथाम्भसा प्रचलता, तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन, दृश्यते भ्रमतीव भूः ॥ 53॥

yathāmbhasā pracalatā, taravo'pi calā iva .
cakṣuṣā bhrāmyamāṇena, dṛśyate bhramatīva bhūḥ .. 53..

यथा मनोरथधियो, विषयानुभवो मृषा ।
स्वप्नदृष्टाश्च दाशार्ह, तथा सं(म्)सार आत्मनः ॥ 54॥

yathā manorathadhiyo, viṣayānubhavo mṛṣā .
svapnadṛṣṭāśca dāśārha, tathā saṃ(m)sāra ātmanaḥ .. 54..

अर्थे ह्यविद्यमानेऽपि, सं(म्)सृतिर्न निवर्तते ।
ध्यायतो विषयानस्य, स्वप्नेऽनर्थागमो यथा ॥ 55॥

arthe hyavidyamāne'pi, saṃ(m)sṛtirna nivartate .
dhyāyato viṣayānasya, svapne'narthāgamo yathā .. 55..

तस्मादुद्धव मा भुङ्क्ष्व, विषयानसदिन्द्रियैः ।
आत्माग्रहणनिर्भातं(म्), पश्य वैकल्पिकं(म्) भ्रमम् ॥ 56॥

tasmāduddhava mā bhuṅkṣva, viṣayānasadindriyaiḥ .

ātmāgrahaṇanirbhātaṃ(m), paśya vaikalpikaṃ(m) bhramam .. 56..

क्षिप्तोऽवमानितोऽसद्भिः(फ्), प्रलब्धोऽसूयितोऽथ वा ।
ताडितः(स्) सन्निबद्धो वा, वृत्त्या वा परिहापितः ॥ 57॥

kṣipto'vamānito'sadbhiḥ(ph), pralabdho'sūyito'tha vā .

tāḍitaḥ(s) sannibaddho vā, vṛttyā vā parihāpitaḥ .. 57..

निष्ठितो मूत्रितो वाज्ञैर्- बहुधैवं(म्) प्रकम्पितः ।
श्रेयस्कामः(ख्) कृच्छ्रगत, आत्मनाऽऽत्मानमुद्धरेत् ॥ 58॥

niṣṭhito mūtrito vājñair- bahudhaivaṃ(m) prakampitaḥ .

śreyaskāmaḥ(kh) kṛcchragata, ātmanā''tmānamuddharet .. 58..

उद्धव उवाच
यथैवमनुबुध्येयं(वँ), वद नो वदतां(वँ) वर ।
सुदुः(स्)सहमिमं(म्) मन्ये, आत्मन्यसदतिक्रमम् ॥ 59॥

uddhava uvāca

yathaivamanubudhyeyaṃ(ṽ), vada no vadatāṃ(ṽ) vara .

suduḥ(s)sahamimaṃ(m) manye, ātmanyasadatikramam .. 59..

विदुषामपि विश्वात्मन्, प्रकृतिर्हि बलीयसी ।
ऋते त्वद्धर्मनिरतान्, शान्तां(म्)स्ते चरणालयान् ॥ 60॥

viduṣāmapi viśvātman, prakṛtirhi balīyasī .

ṛte tvaddharmaniratān, śāntāṃ(m)ste caraṇālayān .. 60..

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेएकादशस्कन्धे द्वाविं(म्)शोऽध्यायः॥

iti* śrīma*dbhāgavate mahāpurāṇe pāramahaṃ(m)syāṃ(m)

saṃ(m)hitāyāṃ ekādaśa*ska*ndhe dvāviṃ(m)śo'dhyāyaḥ .. 22..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुद*च्यते

पूर्ण*स्य पूर्णमादाय पूर्णमेवावशि*ष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamuda*cyate|

Pūrṇa*sya Pūrṇamādāya Pūrṇamevāvashi*ṣyate ||

Om Shāntih(ś) Shāntih(ś) Shāntih ||

